[1]ग्रहणकशास्त्रम् । 'अतो भिस ऐस्' (७ . १ . ९/२०३) इत्येवमादिषु [2]पूर्वग्रहणकशास्त्रं न [3]प्रवर्तत एव । अतपरा [4]अणस्तस्यावकाशः[5] । किमुदाहरणम् ? 'अतो भिस ऐस्' (७ . १ . ९/२०३)–वृक्षैः । प्लक्षैः[6] । 'विड्वनोरनुनासिकस्यात्' (६ . ४ . ४१/२९८२)–अब्जाः, गोजाः (ऋ. ४ . ४० . ५)। तत्कालस्य इति किम्? खट्वाभिः। मालाभिः ॥

## [7]आदिरन्त्येन सहेता । (७१/२)

[8]आदिरन्त्येन इत्सञ्ज्ञकेन सह गृह्यमाणस्तन्मध्य[9]पतितानां वर्णानां ग्राहको भवति, स्वस्य च रूपस्य । अण् । अक् । अच्[10] । हल् । सुप् । तिङ्[11] । अन्त्येन इति किम् ? सुट् इति [12]तृतीयैकवचनेन टा इत्यनेन ग्रहणं मा भूत्[13] ॥

## येन विधिस्तदन्तस्य । (७२/२६)

येन [14]विशेषणेन विधिर्विधीयते स तदन्तस्य [15]आत्मान्तस्य समुदायस्य [16]ग्राहको भवति, स्वस्य च रूपस्य । 'एरच्' (३ . ३ . ५६/३२३१), इवर्णान्ताद्[17] अच्प्रत्ययो भवति---चयः । जयः[18] । अयः । 'ओरावश्यके' (३ . १ . १२५/२८८६), उवर्णान्ताद् ण्यद्[19] भवति–अवश्यलाव्यम् । [20]अवश्यपाव्यम् ।

[१२] [21]समासप्रत्ययविधौ तदन्तविधेः प्रतिषेधो वक्तव्यः[22] । (म.भा. १ . १८४)

[23]द्वितीयान्तं श्रितादिभिः सह समस्यते (२ . १ . २४/६८६)–कष्टश्रितः। इह मा भूत्–कष्टं परमश्रित [24]इति । प्रत्ययविधौ–'[25]नडादिभ्यः फक्' (४ . १ . ९९/११०१), नडस्यापत्यं नाडायनः । इह मा भूत्–सूत्रनडस्यापत्यं[26] सौत्रनाडिः। किमविशेषेण? न इत्याह (म.भा. १ . १८३) ।

[१३] उगिद्वर्णग्रहणवर्जम् [27]इति वाच्यम् । (म.भा. १ . १८५)

'उगितश्च' (४ . १ . ६/४५५) इति ङीप्प्रत्ययः तदन्तादपि[28] भवति---भवती,[29] अतिभवती । [30]वर्णग्रहणम्[31]—'अत इञ्' (४ . १ . ९५/१०९५), दाक्षिः । प्लाक्षिः ।

[१४] यस्मिन् विधिस्तदादावल्ग्रहणे[32] । (म.भा. १ . १८८)

[33]अल्ग्रहणेषु यस्मिन् विधिस्तदादौ [34]इति वक्तव्यम् । 'अचिश्नुधातुभ्रुवां य्वोरियङुवङौ' (६ . ४ . ७७/२७१) इति--श्रियः । भ्रुवः[35] ॥

---

1. ग्राहकशास्त्रम् ह. 2. पूर्वं ड. ह. ई, पूर्वग्राहकशास्त्रम् ह. 3. प्रवृत्तमेव अ. क. 4. अणः नास्ति ग.
5. इति इत्यधिकम् क. ड. 6. प्लक्षैः नास्ति ई. 7. आदिः नास्ति क. 8. आदिर्वर्णोऽन्त्येन इता सह ग, अन्त्येन इता
इत्सञ्ज्ञकेन क. ड. 9. मध्यवर्तिनाम् ड. ह. 10. अच् नास्ति फ. 11. आदिग्रहणं स्पष्टार्थम् इत्यधिकम् ग. फ.
12. तृतीयैकवचने फ. 13. इति इत्यधिकम् फ. 14. शब्देन ग. फ. 15. आत्मान्तस्य नास्ति ह. 16. सञ्ज्ञा क.
ग. 17. धातोः इत्यधिकम् अ, इवर्णान्तात् प्रत्ययो भवति ब. 18. जयः, अजः ह, जपः ब, अयः नास्ति फ.
19. ण्यत्प्रत्ययः ग. फ. ह. 20. अवश्यभाव्यम् अ. इ. फ़. ह, अवश्यवाच्यम् ह. 21. प्रतिषेधः समासविधौ
प्रत्ययविधौ च तदन्तविधिः क. ड. फ, तदन्तविधौ प्रतिषेधः ग. 22. वक्तव्यः नास्ति फ. 23. द्वितीया श्रितादिभिः ई.
24. इति नास्ति क. ड. फ. 25. सूत्रमिदं नास्ति ह. 26. इति इत्यधिकम् ग. ह, सौत्रनाडिः नास्ति फ. ह.
27. इति नास्ति क. ड. फ, वाच्यम् नास्ति ह. 28. अपि नास्ति ह. 29. भवती नास्ति फ, महती । अतिमहती क. ड.
30. वर्णग्रहणे ह. 31. इति किम्? इत्यधिकं क. ग. फ. 32. इति वक्तव्यम् इत्यधिकम् ग. ह.
33. अल्ग्रहणे ड, वाक्यमिदं नास्ति ग. ह. 34. इति नास्ति फ. 35. श्रियौ, भुवौ क. फ.